श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीकूर्मराजस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीकूर्मराजस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

लोका वदन्ति वसतौ मम कूर्मदृष्टिः
भव्याय नेति भगवन्! मम कूर्मराज!।
जानाम्यहं किल समाश्रितवत्सलस्य
तत्त्वं हरे! तव तदेष्वपि चेष्टितेषु॥ १ ॥

पूर्वं जिता दितिभवैः विबुधास्तदार्ताः
प्राप्तुं शुभं तदमृतं सुभगां च लक्ष्मीम्।
त्वच्चोदिताः किल पयोनिधिमध्यदेशे
सर्पेण मन्दरजुषा मथितुं प्रवृत्ताः॥ २ ॥

मग्नेऽथ मन्दरगिरौ महता भयेन
मान्यं परेशमभजन् सहसा सुरास्त्वां।
कूर्माकृतिर्घनविशालकठोरपृष्ठः
त्वं मन्दरं प्रतिवहन्नददाः प्रमोदम्॥ ३ ॥

तं त्वां तदा कमठरूपमवेक्षमाणाः
नो केवलं तमचलं सकलं च लोकम्।
पृष्ठे वहन्तमभजन्नमृतं च लक्ष्मीं
त्वं चापि काञ्चन हरे! श्रितरक्षणेन॥ ४ ॥

एवं ममापि भवदीयकथारतस्य
संसीदतो निरवलम्बमहो कुटुम्बे।
लक्ष्मीं सुखं च सकलं सपदि प्रदातुं
त्वं तादृशो मम दृशोरभवः पुरस्तात्॥ ५ ॥

www.prapatti.com

सकृद्यद्दर्शनं कुर्वन् मुहुर्दर्शनकौतुकी।
जनो भवति तं कूर्मं मम कामयते वचः॥ ६ ॥

॥ इति श्रीकूर्मराजस्तवः समाप्तः॥

www.prapatti.com